# सुन्दरकाण्ड षट्चत्वारिंशः सर्गः (४६) - पञ्चसेनापतिवधः

हतान् मन्त्रि सुतान् बुद्ध्वा वानरेण महात्मना ।
रावणः संवृताकारश् चकार मतिमुत्तमाम् ॥ १ ॥

स विरूपाक्ष यूपाक्षौ दुर्धरं चैव राक्षसम् ।
प्रघसं भासकर्णं च पञ्च सेनाग्र नायकान् ॥ २ ॥

सन्दिदेश दशग्रीवो वीरान् नय विशारदान् ।
हनुमद् ग्रहणे व्यग्रान् वायुवेग समान्युधि ॥ ३ ॥

यात सेनाग्रगाः सर्वे महाबल परिग्रहाः ।
सवाजि रथ मातङ्गाः स कपिः शास्यतामिति ॥ ४ ॥

यत्तैश्च खलु भाव्यं स्यात् तमासाद्य वनालयम् ।
कर्म चापि समाधेयं देशकाल विरोधिनम् ॥ ५ ॥

न ह्यहं तं कपिं मन्ये कर्मणा प्रति तर्कयन् ।
सर्वथा तन् महद् भूतं महाबल परिग्रहम् ॥ ६ ॥

भवेदिन्द्रेण वा सृष्ट मस्मदर्थं तपोबलात् ।
सनाग यक्ष गन्धर्वा देवासुर महर्षयः ॥ ७ ॥

युष्माभिः सहितैः सर्वैर् मया सह विनिर्जिताः ।
तैरवश्यं विधातव्यं व्यलीकं किञ्चिदेव नः ॥ ८ ॥

तदेव नात्र सन्देहः प्रसह्य परिगृह्यताम् ।
नावमान्यो भवद्भिश्च हरिर् धीर पराक्रमः ॥ ९ ॥

दृष्टा हि हरयः पूर्वं मया विपुल विक्रमाः ।
वाली च सहसुग्रीवो जाम्बवांश्च महाबलः ॥ १० ॥

नीलः सेनापतिश्चैव ये चान्ये द्विविदादयः ।
नैवं तेषां गतिर्भीमा न तेजो न पराक्रमः ॥ ११ ॥

न मतिर्न बलोत्साहौ न रूप परिकल्पनम् ।
महत् सत्त्व मिदं ज्ञेयं कपि रूपं व्यवस्थितम् ॥ १२ ॥

प्रयत्नं महदास्थाय क्रियतामस्य निग्रहः ।
कामं लोकास्त्रयः सेन्द्राः ससुरासुर मानवाः ॥ १३ ॥

भवता मग्रतः स्थातुं न पर्याप्ता रणाजिरे ।
तथापि तु नयज्ञेन जय माकाङ्क्षता रणे ॥ १४ ॥

आत्मा रक्ष्यः प्रयत्नेन युद्ध सिद्धिर्हि चञ्चला ।
ते स्वामि वचनं सर्वे प्रतिगृह्य महौजसः ॥ १५ ॥

समुत्पेतुर् महावेगा हुताश सम तेजसः ।
रथैर् मत्तैश्च मातङ्गैर् वाजिभिश्च महाजवैः ॥ १६ ॥

शस्त्रैश्च विविधैस् तीक्ष्णैः सर्वैश् चोपचिता बलैः ।
ततस्तं ददृशुर् वीरा दीप्यमानं महाकपिम् ॥ १७ ॥

रश्मिमन्त मिवोद्यन्तं स्वतेजो रश्मि मालिनम् ।
तोरणस्थं महोत्साहं महासत्त्वं महाबलम् ॥ १८ ॥

महामतिं महावेगं महाकायं महाबलम् ।
तं समीक्ष्यैव ते सर्वे दिक्षु सर्वास् ववस्थिताः ॥ १९ ॥

तैस्तैः प्रहरणैर् भीमै रभिपेतुस् ततस्ततः ।
तस्य पञ्चायसास् तीक्ष्णाः शिताः पीतमुखाः शराः ॥ २० ॥

शिरस् युत्पल पत्राभा दुर्धरेण निपातिताः ।
स तैः पञ्चभिराविद्धः शरैः शिरसि वानरः ॥ २१ ॥

उत्पपात नदन् व्यम्नि दिशो दश विनादयन् ।
ततस्तु दुर्धरो वीरः सरथः सज्य कार्मुकः ॥ २२ ॥

किरन् शर शतैस् तीक्ष्णै रभिपेदे महाबलः ।
स कपिर् वारयामास तं व्योम्नि शरवर्षिणम् ॥ २३ ॥

वृष्टिमन्तं पयोदान्ते पयोदमिव मारुतः ।
अर्द्यमानस् ततस्तेन दुर्धरेणा निलात्मजः ॥ २४ ॥

चकार कदनं भूयो व्यवर्धत च वेगवान् ।
स दूरं सहसोत्पत्य दुर्धरस्य रथे हरिः ॥ २५ ॥

निपपात महावेगो विद्युद् राशिर् गिराविव ।
ततः स मथिताष्टाश्वं रथं भग्नाक्ष कूबरम् ॥ २६ ॥

विहाय न्यपतद् भूमौ दुर्धरस् त्यक्त जीवितः ।
तं विरूपाक्ष यूपाक्षौ दृष्ट्वा निपतितं भुवि ॥ २७ ॥

सञ्जात रोषौ दुर्धर्षा वुत्पेततु ररिन्दमौ ।
स ताभ्यां सहसोत्पत्य विष्ठितो विमलेऽम्बरे ॥ २८ ॥

मुद्गराभ्यां महाबाहुर् यक्षस्यभिहतः कपिः ।
तयोर् वेगवतोर् वेगं विनिहत्य महाबलः ॥ २९ ॥

निपपात पुनर् भूमौ सुपर्ण सम विक्रमः ।
स साल वृक्ष मासाद्य समुत्पाट्य च वानरः ॥ ३० ॥

तावुभौ राक्षसौ वीरौ जघान पवनात्मजः ।
ततस्तां स्त्रीन् हतान् ज्ञात्वा वानरेण तरस्विना ॥ ३१ ॥

अभिपेदे महावेगः प्रसह्य प्रघसो हरिम् ।
भास कर्णश्च सङ्क्रुद्धः शूलमादाय वीर्यवान् ॥ ३२ ॥

एकतः कपि शार्दूलं यशस्विन मवस्थितम् ।
पट्टसेन शिताग्रेण प्रघसः प्रत्ययोधयत् ॥ ३३ ॥

भास कर्णश्च शूलेन राक्षसः कपि सत्तमम् ।
स ताभ्यां विक्षतैर् गात्रै रसृग् दिग्ध तनूरुहः ॥ ३४ ॥

अभवद् वानरः क्रुद्धो बाल सूर्य समप्रभः ।
समुत्पाट्य गिरेः शृङ्गं समृग व्याल पादपम् ॥ ३५ ॥

जघान हनुमान् वीरो राक्षसौ कपि कुञ्जरः ।
ततस् तेष्ववव सन्नेषु सेनापतिषु पञ्चसु ॥ ३६ ॥

बलं तदवशेषं च नाशयामास वानरः ।
अश्वै रश्वान् गजैर् नागान् योधैर् योधान् रथै रथान् ॥ ३७ ॥

स कपिर् नाशयामास सहस्राक्ष इवासुरान् ।
हतैर्नागैश्च तुरगैर् भग्नाक्षैश्च महारथैः ।
हतैश्च राक्षसैर्भूमी रुद्धमार्गा समन्ततः ॥ ३९ ॥

ततः कपिस्तान् ध्वजिनी पतीन् रणे
निहत्य वीरान् सबलान् सवाहनान् ।
समीक्ष्य वीरः परिगृह्य तोरणं
कृतक्षणः काल इव प्रजाक्षये ॥ ३९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥